# नारदीयसूत्रे भक्तिवैशिष्ट्यम् - मोनिका वर्मा

मोक्षः भारतीयचिन्तनस्य परमप्रयोजनमस्ति। मुमुक्षवः जनाः तापत्रयात् विमुक्तये त्रीणि साधनानि प्रयुंज्यन्ति- ज्ञानं, कर्म, भक्तिश्च। तेषु त्रिषु भक्त्याः परमा प्रसिद्धिरस्ति सहजत्वात्। यतोहि ज्ञानकर्मणी साधनयोग्यते च अपेक्षेते परन्तु भक्तिमार्गे कोऽपि प्रतिबन्धो नास्ति। अतः मोक्षमार्गस्यायं भक्तिमार्गः सरलः सुगमः,सहजश्च मार्ग उच्यते।

उपनिषच्छास्त्राणि ज्ञानकमर्णः प्रतिपादकानि सन्ति तत्र भक्तिमार्गस्य प्रतिपादनं स्फुटरूपेण न प्राप्यते अथवा ज्ञानप्रतिपादने भक्तिः पराभूता इव दृश्यते । वस्तुतः पुराणशास्त्रेषु विशेषतः भागवतपुराणे अथवा संस्कृतेतरेषु आलावरमीरांकबीरसूरदासादीनां लौकिककाव्येषु भक्तिमार्गस्य प्रधानता दृश्यते। ज्ञानकर्मणः विषयाः दुरूहास्सन्ति तस्मात् अनुजैनबौद्धावतारं सामान्यजनानां रुचिः भगवतः चरित्रमवलम्ब्य कथासंकीर्तनाद्, गाानाद्, नृत्याद् वा मोक्षमार्गे उन्मुखा अस्ति इति विलोक्य भक्त्युपरि सूत्रशैल्या साहित्यस्य रचनायाः महत्त्वं विचार्य भक्तिसूत्राणि रचितानि । तेषु नारदभक्तिसूत्रं शाण्डिल्यभक्तिसूत्रं च महत्वपूर्णमस्ति। भक्तिमार्गे कोऽपि पात्रता आवश्यकी नास्ति तत्र तु अनन्यश्रद्धा आवश्यकी वर्तते यः अनन्यभावेन भगवन्तं कृष्णं केनापि साधनेन कथमपि भजति, प्रीतिं करोति वा सेवां करोति, नैवेद्यं निवेदयति,पाययति, स्नापयति, खादयति, स्वापयति, गीतं श्राावयति, चरित्रं कथयति तत् सर्वं भक्तिरिति उच्यते[1]

अत्र जिज्ञासा जाता केयं भक्तिः। अमरकोशकार उच्यते- श्रद्धारचनयोर्भक्तिर्गौण्यां वृत्तौ च सेवने ।[2] भजधातोः क्तिन्प्रत्ययेन निष्पन्नं पदमिदम् । भजधातुः प्रीतिसेवयोः अर्थयोः भवति। शाण्डिल्यसूत्रेऽपि भक्तिविषये प्राप्यते-अथातों भक्तिजिज्ञासा सा परानुरक्तिरीश्वरे इति।[3] । उपासना अर्थात् परमेश्वरविषये परमप्रेम । नारदीयभक्तिसूत्रे भक्त्याः लक्षणरूपे प्राप्यते- सा त्वस्मिन्न परमप्रेमरुपा।[4] अमृतस्वरूपा च ।[5] यल्लब्ध्वा पुमान् सिद्धो भवति अमृतो भवति तृप्तो भवति।[6] यद् प्राप्य न किंचिद् वांछति न शोचति न रमते न द्वेष्टि न रमते नोत्साही भवति।[7] अर्थात् भक्त्यां हरिप्रेम विहाय कस्यापि कामना न विद्यते अशुभभावोऽपि न विद्यते ।

भक्तिः वस्तुतः निष्कामकर्मणः विग्रहवत् स्वरूपमस्ति। फलस्याकांक्षाहीनं कर्म निष्कामकर्म उच्यते । जगति दृश्यते यत् जनाः कर्मफलं विचिन्त्य कर्माणि कुर्वन्ति। कर्मफलस्य आकांक्षा रागद्वेषादीनां भावानां जनयित्री तया भावनया जनाः आत्मकामत्वं विहाय सांसारिककुचक्रे पतति। अनेकवारं भवसागरे निमज्जन्ति अतः भगवान् श्रीकृष्णः कामनाविहीनं कर्म उपदिशति- कर्मण्येव वाधिकारस्ते मा फलेषु कदाचन।[8] किंच ईशोपनिषदि अपि प्राप्यते- कुर्वन्नेवेह कर्माणि जीजिविषेच्छतं समाः।[9] ज्ञानेन निष्कामकर्मणा वा जनाः भवसागरात् विमुंचन्ति परन्तु ज्ञानमार्गः अरण्यनिवासिनेभ्यः सार्थकः भवति। कर्ममार्गेण गृहस्थजनाः वितरन्ति। भक्तिमार्गस्तु अरण्येऽपि फलति तद्वद् गृहेऽपि। कर्ममार्गो वा अथवा ज्ञानमार्गः अनयोः द्वयोः मार्गयोः परिणति ईश्वरे अनन्यश्रद्धारूपे परिणमति परन्तु भक्तिमार्गे प्रथमरूपतया श्रद्धा एव जायते अतः श्रीमद्भगवद्गीतायां श्रीकृष्णेनापि निगदितं यत्-

योगिनामपि सर्वेषां मद्गतेनान्तरात्मा। श्रद्धावान्भजते यो मां स मे युक्ततमो मतः।। [10]

अत्रापि भगवता वासुदेवेन मुखरविन्दादपि भक्तः प्रशंसितः। नारदोऽपि वचति- यद् सा न कामयमाना निरोधरूपात् निरोधः एवं सूत्रितः- निरोधस्तु लोकवेदव्यापारन्यासः।[11] अर्थात् भक्तिमार्गे वैदिककर्मण अपि त्यागः भवति तदा भक्तः किं करोति अथवा कीदृशं कर्म करोति समाधत्ते- लोके वेदेषु तदनुकूलाचरणं तद्विरोधिषूदासीनता।[12]। अस्मिन् विषये भगवद्गीतायां स्पष्टरूपेणोक्तम्-

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः। नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते।।[13]

प्रीतिर्सेवा वा नैर्वैषयकी ना भवति तत्र कस्यापि तत्त्वस्य ग्रहणमावश्यकमस्ति कालान्तरे कामम् आधाराधेयविषयकः भेदः मा भवेद् परन्तु प्रथमचरणे आधार आवश्यकः मन्यते। भक्तया भक्तः भगवन्मयः भवति तदा भक्त्या वशीभूतः भगवान् भक्तस्यानुकारी अपि भवति। भक्तेर्वैशिष्ट्येयम् यत् ज्ञानकर्ममार्गे मुमुक्षुः मोक्षपदमनुसरति परन्तु अत्र मोक्षस्वरूपः निर्गुणब्रह्म स्वयमेव साकारं भूत्वा भक्तान् लीलामृतं पाययति। तस्य पानं तु अनिर्वचनीयमस्ति। भगवति तत्परे भक्तस्य निजता नश्यति तत्र भक्तः भगवान् वा भेदोऽयं दुग्राह्यो भवति। भक्तस्य प्रतिपलं भगवते भवति अतः तत्र कर्मफलं मोक्षस्यापि कामना पलायते केवलं तत्र भगवतः प्रियं कथं स्यात्, तादृशी भावना वर्तते। यथा शरीरे श्वसनं, रक्तपरिसंचरणं स्वतः भवति

तथैव भक्तस्य प्रत्येकं कर्म स्वतः भगवदार्थम् भवति। कदाचिद् ज्ञानकर्मणि वा अहंकारमपि जायेत् परन्तु भक्तिः अहंकारशून्या भवति अतः भगवान् भक्तं न पातयति।

अत्र नारदः दृष्टान्तरूपेण गोपांगनानां निर्दिशति तत्र वयं जानीमः यत् गोपागंनानां काऽपि निजता नास्ति ताः दुग्धदोहनं, जलानयनं,गृहमार्जनं, दुग्धवितरणं इत्यादीनि नाना कर्माणि कुर्वन्ति परन्तु तत्र कृष्णवैषयिकी प्रीतिः लुप्ता न भवति तत् सर्वं कृष्णाय एव आसीत् । एवमेव तासां गोपांगनानां प्रीति ,उपालम्भाः, रागः, द्वेषः एतेषां भावानामाधारोऽपि श्रीकृष्णोऽस्ति। अतः भक्तिः ज्ञानकर्मणः गरीयसी उच्यते। किंच तत्र जगतः शून्यता अपि ज्ञायते सर्वं कृष्णायते। एतादृशी भावना ज्ञानकर्मणः परमसारः उच्यते निष्कामकर्मण अपि अतः नारदीयभक्तिसूत्रे ज्ञानं भक्त्याः साधनरूपे उक्तं।[14] श्रीमद्भगवद्गीता श्रीकृष्ण उच्यते- सर्वधर्मान् परित्यज्य मामेकं शरण व्रजं।[15] नारदोऽपि सूत्रयति- तदर्पिताखिलाचारता तद्विस्मरणे परमव्याकुलतेति।[16] तदा भक्तस्य यादृशी स्थितिर्जायते तादृशी स्थितिः ज्ञानिनः कर्मयोगिनः वा भवति- गुणरहितं कामनारहितं प्रतिक्षणवर्धमानमविच्छिन्नं सूक्ष्मतरमनुभवरूपम्।[17] भक्तः कृष्णात् परः किमपि तत्त्वं न जानाति ततः परः प्रीयमाणः भगवानपि भक्त्या भक्तान् स्वरूपं दर्शयति-

भक्त्या त्वनन्यया शक्यअहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपः।।[18]

स्पष्टमिदं यत् ज्ञानकर्माभ्यां भक्तिरेव गरीयसी। यतोहि भगवान् भक्तवत्सलः। यो अनन्यभक्त्या भगवन्तं भजति भगवानपि तमेव चिन्तयति किंच यः वैरभावेनापि भगवन्तं चिन्तयति भगवान् तमपि मोक्षं प्रददाति। किंच भक्तिः ज्ञानस्य फलरूपा अतः अनया दृष्ट्याऽपि भक्तिः श्रेष्ठतरा अतः नारदः सिद्धान्तरूपेण कथयति-त्रिसत्यस्य भक्तिरेव गरीयसी भक्तिरेव गरीयसी[19]

सन्दर्भः

1नारदीयसूत्रम्- पूजादिष्वनुराग इति पाराशर्यः16, कथादिष्विति गर्ग17, आत्मरत्यविरोधेनेति18

2अमरकोश3/3/85,पृ.569,चतुर्थसंस्करण, चौखम्भा पब्लिकेशन, नई दिल्ली।

3शाण्डिल्यभक्तिसूत्रम्- सूत्र1, 2

4 नारदीयभक्तिसूत्रम्- 2

5 नारदीयभक्तिसूत्रम्- 3

6 वही- 4

7 वही-5

8 श्रीमद्भगवद्गीता

9 ईशावास्योपनिषद्-2

10 श्रीमद्भगवद्गीता-6/46

11 नारदीयभक्तिसूत्र- 7

12 नारदीयभक्तिसूत्र- 11

13 श्रीमद्भगवद्गीता-6/47

14 तस्या ज्ञानमेव साधनमित्येके, नारदीयभक्तिसूत्र- 28

15 श्रीमद्भगवद्गीता

16 नारदीयभक्तिसूत्र- 19

17 नारदीयभक्तिसूत्र- 54

18 श्रीमद्भगवद्गीता-11/54

19 नारदीयभक्तिसूत्र- 81